किमनेन तेऽपकृतम्! आः पाप दुश्चरित चन्द्र चाण्डाल कृतार्थोऽसि। इदानीमपगतदाक्षिण्य दक्षिणानिलहतक पूर्णास्ते मनोरथाः। कृतं यत्कर्तव्यम्। वहेदानीं यथेष्टम्।

**तृतीयो वर्गः** 7½

6. अभिज्ञानशाकुन्तलस्य नायिका का? चरित्र चित्रणं विधीयताम्।
7. 'महाश्वेतावृत्तान्तस्य' काव्यवैशिष्ट्यं प्रतिपादयत।

**चतुर्थो वर्गः** 7½

8. कयोश्चिद् द्वयोः अलंकारयोः सोदाहरणं लक्षणं प्रतिपाद्यताम् यमकम्, विशेषोक्तिः, स्वभावोक्तिः, अतिशयोक्तिः।
9. के काव्यगुणाः? प्रसादगुणस्य सोदाहरणं स्वरूपं विवेच्यताम्।





**Roll. No. ____________**

# A-172

## बी.ए. (द्वितीयवर्षम्) परीक्षा, 2015

### संस्कृतम्

### प्रथमप्रश्नपत्रम्

### (नाटकं गद्यकाव्यं काव्यशास्त्रञ्च)

**समयावधि : घण्टात्रयम्** ] [ **पूर्णाङ्कः 50**

**निर्देश : पञ्च** प्रश्नाः समाधेयाः प्रथमः प्रश्नोऽनिवार्यः।

प्रतिवर्गम् **एकैकः** प्रश्नोऽवश्यं समाधेयः

1. अधोलिखितानां लघुत्तराणि विलिख्यन्ताम् 2×10=20

(क) पुण्डरीकः

(ख) उपमालङ्कारः

(ग) वैदर्भीरीतिः

(घ) नेपथ्यम्

(ङ.) महर्षिकण्वः

(च) कादम्बरी

(छ) 'अर्थो हि कन्या परकीय एव'

(ज) कालिदासस्य नाटकानि

(झ) रूपकालङ्कारस्य उदाहरणम्

(ञ) नान्दी

**प्रथमो वर्ग :**

2. अद्योलिखितस्य श्लोकद्वयस्य प्रसङ्गनिर्देशपर्वकम् व्याख्या विधेया- 7½

(क) अंसशयं क्षत्रपरिग्रहक्षमा

यदार्यमस्यामभिलाषि मे मनः।

सतां हि सन्देहपदेषु वस्तुषु

प्रमाणमन्तः करण प्रवृत्तयः।।

(ख) यात्येकतोऽस्त शिखरं पतिरोषधीना-

माविष्कृतोऽरूणपुरःसर एकतोऽर्क;।

तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां

लोकोनियम्यत इवैष दशान्तरेषु।।

3. अधोलिखितयोः श्लोकयोः सन्दर्भनिर्देशपूर्वकं भावार्थो विधेयः

(क) सरसिजमनुविद्धं शैवलेनापि रम्यं

मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।

इयमधिकमनोज्ञा वल्कलेनापि तन्वी

किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।





(ख) अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलञ्चात्मन

स्त्वय्यस्याः कथमत्याबान्धवकृतां स्नेहप्रवृत्तिञ्च ताम्।

सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया

भाग्याधीनमतः परं न खलु तद्वाच्यं वधूबन्धुभिः।।

**द्वितयोवर्गः**

4. अधोलिखितस्य गद्यावतरणस्य अनुवादो हिन्दी भाषया विधीयताम्- 7½

पञ्चमहाभूतमयमपहाय द्रव्यात्मकमङ्गनिष्पादनोपकरणकलापं धवलगुणेनेव केवलोत्पादिताम्, अध्वरक्रियामिवोद् धतगणकच–ग्रहभयोपसेवितत्र्यम्बकां, रतिमिव मदनदेहनिमित्तं हरप्रसादनार्थ-मागृहीतहराराधनां, क्षीरोदाधिदेवतामिव सहवासपरिचितहरचन्द्र-लेखोत्कण्ठाम् इन्दुमूर्तिमिव स्वर्भानुभयकृतत्रिनयनशरणगमनाम्, ऐरावतदेहच्छविमिव गजाजिनाव-गुण्ठोत्कण्ठितशितिकण्ठचिन्तितोपनतां प्रतिपन्नपाशुपतव्रतां कन्यकां ददर्श।

5. हिन्दीभाषया अनुवादो विधीयताम् -

अथ निशीथप्रभावाद्दूरादेव विभाव्यमानस्वरमुन्मुक्तार्तनादं हा हतोऽस्मि! हा दग्धोऽस्मि! हा वंचितोऽस्मि! हा किमिदमापतितं! किं वृत्तम्! उत्सन्नोडस्मि! दुरात्मन् मदनपिशाच पाप निर्घृण, किमिदमकृत्यमनुष्ठितम्! आः पापे दुष्कृतकारिणि दुर्विनीते महाश्वेते,